5 शीलायाः प्रवासः

E6X9J1

सविता : (भ्रमणभाषं धृत्वा) हरिः ॐ ।

शिक्षिका : हरिः ॐ । कः वदति ?

सविता : अहं शीलायाः माता वदामि । प्रवासे मम पुत्री अस्ति ।





शिक्षिका : आम् अस्ति । किञ्चित् कार्यम् अस्ति वा ?

सविता : आम्, अहं तया सह वार्तालापं कर्तुम् इच्छामि । (शिक्षिका शीलां प्रति भ्रमणभाषं प्रेषयति ।)

शीला : अम्ब, कथम् अस्ति सर्वं कुशलं वा ?

सविता : आम्, अहं कुशलिनी । भवत्याः प्रवासः कथं प्रचलति ?

शीला : प्रवासः तु सम्यक् प्रचलति । अधुना अहम् अजन्तागुहायाम् अस्मि ।

सविता : शोभनम् । तत्र किं किम् अस्ति ?

शीला : अत्र अनेकानि चित्राणि शिल्पानि च सन्ति ।



सविता : तत्र कानि चित्राणि सन्ति ?

शीला : भगवतः बुद्धस्य शिल्पं सुन्दरम् अस्ति । अन्यत् च चतुर्मुखस्य हरिणस्य चित्रम् अपि मनोहरम् अस्ति । अत्र बहूनि सुन्दराणि चित्राणि अपि सन्ति ।

सविता : पद्मपाणेः चित्रं तत्र अस्ति वा ?

शीला : आम्, अस्ति । अस्माभिः सह मार्गदर्शकः अपि अस्ति ।

सविता : सः किं कथयति ?

शीला : सः बौद्धगुहायाः विषये अस्माभिः सह वार्तालापं करोति । अपि च, गुहायाः इतिहासम् अपि कथयति ।

सविता : तेषां स्थानानां कानिचित् छायाचित्राणि आनयतु ।

शीला : अवश्यम् आनेष्यामि ।

सविता : अजन्तातः प्रवासः कुत्र गमिष्यति ?

शीला : अजन्तातः वयं घुष्णेश्वरं, घुष्णेश्वरतः शीरडीम्, शीरडीतः त्र्यम्बकेश्वरम्, त्र्यम्बकेश्वरतः नासिकं गमिष्यामः ।

सविता : शोभनम्, प्रवासः शिक्षणस्य भागः एव अस्ति । तर्हि सम्यक् रीत्या प्रवासं करोतु । भवती प्रवासे यत् यत् पश्यति तत् तत् सर्वं टिप्पणीपुस्तके लिखतु ।

शीला : आम्, अवश्यं लेखिष्यामि ।

सविता : अपि च, प्रवासस्थानस्य विशेषतां तथा तस्य स्थानस्य इतिहासविषये अपि लिखतु ।

शीला : अवश्यम् । भवतु, नमो नमः ।

सविता : नमो नमः ।

टिप्पणी

भ्रमणभाषः મોબાઈલ (ફોન) **शीलायाः** શીલાનો **तस्यै** તેણીને **अम्ब** હે માતા **अधुना** અત્યારે **भवत्याः** આપનો (સ્ત્રીલિંગ) **कथम् अस्ति** કેમ છે ? **गुहायाम्** ગુફામાં **चतुर्मुख** ચાર મોઢાંવાળું **पद्मपाणेः** પદ્મપાણિનું **मार्गदर्शकः** ભોમિયો,ગાઈડ **सम्यक् रीत्या** સારી રીતે **बौद्धगुहायाः** બૌદ્ધ ગુફાની **अस्माभिः सह** અમારી સાથે **टिप्पणीपुस्तकम्** નોટબુક **आनयतु** લાવજો.

स्वाध्यायः

Y1L5J5

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :

भ्रमणभाषः, किञ्चित्, प्रेषयति, सम्यक्, प्रचलति, अजन्तागुहायाम्, चतुर्मुखस्य, पद्मपाण्याः, बौद्धगुहायाः, त्र्यम्बकेश्वरम्, घुष्णेश्वरतः, टिप्पणीपुस्तकम् ।

2. નીચેના પ્રશ્નોના જવાબ સંસ્કૃત ભાષામાં આપો :

(1) का दूरभाषं करोति ?

(2) शीला कस्याः पुत्री अस्ति ?

(3) शीला कुत्र गच्छति ?

(4) शीला किं किं पश्यति ?

3. ઉદાહરણ મુજબ આપેલાં વાક્યોને પ્રશ્નવાક્યમાં ફેરવો :

ઉદાહરણ : शीला अजन्तागुहायाम् अस्ति ।

शीला कुत्र अस्ति ?

(1) महेशः ऊद्याने अस्ति ।

(2) फरिदा वाटिकायाम् अस्ति ।

(3) सुनन्दा शालायाम् अस्ति ।

ઉદાહરણ : शीला गृहत: मन्दिरं गच्छति ।

शीला कुत: मन्दिरं गच्छति ?

शीला गृहत: कुत्र गच्छति ?

(1) नरेन्द्र: कार्यालयत: गृहं गच्छति ।

(2) विनय: क्रीडाङ्गणत: वाटिकां गच्छति ।

(3) अलका पालनपुरत: गान्धीनगरं गच्छति ।

4. ઉદાહરણ મુજબ વાક્યો બનાવો :

ઉદાહરણ : नटराज: चित्रम् । नटराजस्य चित्रम् अस्ति ।

(1) वेदान्त: पुस्तकम् । _____

(2) पार्थ: कन्दुक: । _____

(3) कल्पेश: लेखनी । _____

(4) कर्ण: कुण्डलम् । _____

(5) निसर्ग: गृहम् । _____

ઉદાહરણ : शीला पुस्तकम् ।

शीलाया: पुस्तकम् अस्ति ।

(1) रेखा द्विचक्रिका । _____

(2) विद्या प्रभाव: । _____

(3) कृपा आसन्द: । _____

(4) मीना पाठशाला । _____

(5) अनीक्षा शाटिका । _____

5. આપેલાં વાક્યોને સંસ્કૃત ભાષામાં લખો :

(1) આરતી જામનગરથી રાજકોટ જાય છે.

_____

(2) હર્ષા અમરેલીથી જૂનાગઢ જાય છે.

_____

(3) મિહિર અમદાવાદથી સૂરત જાય છે.

_____

(4) કુમાર ભુજથી અમદાવાદ જાય છે.

_____

(5) ઉષા વડોદરાથી પાલનપુર જાય છે.

_____

6. તમારા ગામમાં આવતી બસ ક્યાંથી અને કયા કયા સ્થળેથી આવે છે, તેનું વર્ણન સંસ્કૃતમાં કરો.

જેમકે,

लोकयानं हिंमतनगरत: इडरं गच्छति । इडरत: वटपल्लीं गच्छति । वटपल्लीत: भावनगरं गच्छति ।

संस्कृतसामयिकानां सूचिः

નામ	પ્રકાર	સ્થળ
• गाण्डीवम्	साप्ताहिक	वाराणसी
• उद्यानपत्रिका	मासिक	आन्ध्रप्रदेश
• अभिनवसंस्कृतम्	वार्षिकी	कानपुर
• अनादिवाक्	त्रैमासिक	नई दिल्ली
• अर्वाचीनसंस्कृतम्	त्रैमासिक	नई दिल्ली
• गीर्वाणसुधा	मासिक	मुम्बई
• दिव्यज्योति;	मासिक	शिमला
• पारिजातम्	मासिक	कानपुर
• संस्कृतसन्देश	दैनिक	वडोदरा
• साम्प्रतम्	मासिक	अमदावाद
• सम्भाषण सन्देशः	मासिक	बेंङ्गलुरुः
• रसना	मासिक	केराला